# Matribhume Sada Shakti Sancharike

# मातृभूमे सदा शक्तिसञ्चारिके

## Document Information

Text title : Matribhume Sada Shakti Sancharike

File name : mAtRRibhUmesadAshaktisanchArike.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# मातृभूमे सदा शक्तिसञ्चारिके

(गीतिका)

मातृभूमे । सदा शक्ति-सञ्चारिके ।
    पादपद्मे शुभे ते नतिं सन्ततम् ।
ज्ञान-ज्योति-प्रसू सौख्य-सञ्चारिणी
    दुःख-दावाग्नि-हर्त्री मनोमोहिनी ॥ मातृभूमे० ॥

त्वं हि क्रान्ति सदा न्याय-रक्षा-परा
    शत्रु-सम्मर्दनी क्रूर-मानापहा ।
ज्ञान-शक्ति-प्रदा उद्यमाधायिनी
    शक्ति स्रोत-स्वरुपा सुखाधायिनी ॥ मातृभूमे० ॥

पावनं ते रजःसर्व-सौख्याकरं
    क्रान्तिदूतैः शिरोभिः सदा धारितम् ।
शक्तिदं शौर्यदं भक्तिदं मुक्तिदं
    ज्ञानदं मानदं तापहं पापहम् ॥ मातृभूमे० ॥

पावनं ते पयो दुग्ध-धारोपमं
    पावनं ते वनं पावना पर्वता ।
पावनी ते सरिद् वृक्षमाला शुभा
    पावनं ते समस्त मत सौख्यदम् ॥ मातृभूमे० ॥

पावन ते प्रसून सुगन्धावह
    पावन क्षेतमेतत् सुसस्यैर्वृत्तम् ।
पावन ते दिन पावनी यामिनी
    पावन कन्दमूल फल सौख्यदम् ॥ मातृभूमे० ॥

यत्र हैमो गिरिस्ते किरीटप्रभो
    नाग-कश्मीर-भूस्ते भुजो समतौ ।
यत्र गङ्गा सदा रक्त-सञ्चारिका

विन्ध्यमाला मता पृष्ठवंशोपमा ॥ मातृभूमे० ॥

गुर्जरान्ध्रौ मती यत्र जङ्घोपमौ
मध्यदेश ३ कटि सर्वशोभावृत ।
केरलस्तामिल पादरूपी मतो
सागरेणार्चित पादयुग्म शुभम् ॥ मातृभूमे० ॥

विश्ववन्द्या सदा त्वं गुणैरर्चिता
ज्ञानज्योति प्रदाऽऽअध्यात्म-सन्देशिका ।
सत्यनिष्ठा सदा सत्यशिक्षापरा ।
सत्यधर्मोदया सर्वधर्मप्रिया ॥ मातृभूमे० ॥

विश्वशान्ति सदा ते मतं सम्मतं
विश्वबन्धुत्वशिक्षा सदा ते प्रिया ।
त्वं तु विश्वं कुटुम्बं सदा मन्यसे
ज्ञानदात्री सदा पापहर्त्री मता ॥ मातृभूमे० ॥

क्रान्ति-सञ्चारिणी दुष्ट-संहारिणी
सौख्य-सन्धारिणी दुःख-ते हारिणी ।
शक्तिरुपा सदा भक्तिरूपा प्रिया
जीवनं मेऽर्पितं तेऽऽघ्रियुग्मे शुभे ॥ मातुभूमे० ॥

Proofread by Mandar Mali

*Matribhume Sada Shakti Sancharike*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*